# shrIhanumadaShTottarashatanAmastotram 1

# શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમ્ ૧

## Document Information

Text title : Hanumat Ashtottarashatanama Stotram 1

File name : hanumadaShTottarashatanAmastotram1.itx

Category : hanumaana, aShTottarashatanAma, stotra

Location : doc_hanumaana

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, See corresponding nAmAvalI

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : April 24, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2024

*sanskritdocuments.org*

# શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમ્ ૧

(શ્રીપદ્મોત્તરખણ્ડતઃ)

નારદ ઉવાચ ।

સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞ સર્વદેવનમસ્કૃત ।
યત્ત્વયા કથિતં પૂર્વં રામચન્દ્રેણ ધીમતા ॥ ૧॥

સ્તોત્રં સમસ્તપાપઘ્નં શ્રુત્વા ધન્યોઽસ્મિ પદ્મજ ।
ઇદાનીં શ્રોતુમિચ્છામિ લોકાનાં હિતકામ્યયા ॥ ૨॥

વાયોરંશાવતરણમાહાત્મ્યં સર્વકામદમ્ ।
વદ મે વિસ્તરાદ્બ્રહ્મન્ દેવગુહ્યમનુત્તમમ્ ॥ ૩॥

ઇતિ પૃષ્ટો નારદેન બ્રહ્મા લોકપિતામહઃ ।
નમસ્કૃત્ય જગન્નાથં લક્ષ્મીકાન્તં પરાત્પરમ્ ॥ ૪॥

પ્રોવાચ વાયોર્માહાત્મ્યં નારદાય મહાત્મને ।
યચ્છ્રુત્વા સર્વસૌભાગ્યં પ્રાપ્નુવન્તિ જનાઃ સદા ॥ ૫॥

બ્રહ્મોવાચ ।

ઇદં રહસ્યં પાપઘ્નં વાયોરષ્ટોત્તરં શતમ્ ।
વિષ્ણુના લોકનાથેન રમાયૈ કથિતં પુરા ॥ ૬॥

રમા મામાહ યદ્દિવ્યં તત્તે વક્ષ્યામિ નારદ ।
ઇદં પવિત્રં પાપઘ્નં શ્રદ્ધયા હૃદિ ધારય ॥ ૭॥

ૐ હનુમાનઞ્જનાપુત્રો વાયુસૂનુર્મહાબલઃ ।
રામદૂતો હરિશ્રેષ્ઠઃ સૂરી કેસરીનન્દનઃ ॥

સૂર્યશ્રેષ્ઠો મહાકાયો વજ્રી વજ્રપ્રહારવાન્ ।
મહાસત્ત્વો મહારૂપો બ્રહ્મણ્યો બ્રાહ્મણપ્રિયઃ ॥ ૯॥

મુખ્યપ્રાણો મહાભીમઃ પૂર્ણપ્રજ્ઞો મહાગુરુઃ ।

બ્રહ્મચારી વૃક્ષધરઃ પુણ્યઃ શ્રીરામકિઙ્કરઃ ॥ ૧૦॥

સીતાશોકવિનાશી ચ સિંહિકાપ્રાણનાશકઃ ।
મૈનાકગર્વભઙ્ગશ્ચ છાયાગ્રહનિવારકઃ ॥ ૧૧॥

લઙ્કામોક્ષપ્રદો દેવઃ સીતામાર્ગણતત્પરઃ ।
રામાઙ્ગુલિપ્રદાતા ચ સીતાહર્ષવિવર્ધનઃ ॥ ૧૨॥

મહારૂપધરો દિવ્યો હ્યશોકવનનાશકઃ ।
મન્ત્રિપુત્રહરો વીરઃ પઞ્ચસેનાગ્રમર્દનઃ ॥ ૧૩॥

દશકણ્ઠસુતઘ્નશ્ચ બ્રહ્માસ્ત્રવશગોઽવ્યયઃ ।
દશાસ્યસલ્લાપપરો લઙ્કાપુરવિદાહકઃ ॥ ૧૪॥

તીર્ણાબ્ધિઃ કપિરાજશ્ચ કપિયૂથપ્રરઞ્જકઃ ।
ચૂડામણિપ્રદાતા ચ શ્રીવશ્યઃ પ્રિયદર્શકઃ ॥ ૧૫॥

કૌપીનકુણ્ડલધરઃ કનકાઙ્ગદભૂષણઃ ।
સર્વશાસ્ત્રસુસમ્પન્નઃ સર્વજ્ઞો જ્ઞાનદોત્તમઃ ॥ ૧૬॥

મુખ્યપ્રાણો મહાવેગઃ શબ્દશાસ્ત્રવિશારદઃ ।
બુદ્ધિમાન્ સર્વલોકેશઃ સુરેશો લોકરઞ્જકઃ ॥ ૧૭॥

લોકનાથો મહાદર્પઃ સર્વભૂતભયાપહઃ ।
રામવાહનરૂપશ્ચ સઞ્જીવાચલભેદકઃ ॥ ૧૮॥

કપીનાં પ્રાણદાતા ચ લક્ષ્મણપ્રાણરક્ષકઃ ।
રામપાદસમીપસ્થો લોહિતાસ્યો મહાહનુઃ ॥ ૧૯॥

રામસન્દેશકર્તા ચ ભરતાનન્દવર્ધનઃ ।
રામાભિષેકલોલશ્ચ રામકાર્યધુરન્ધરઃ ॥ ૨૦॥

કુન્તીગર્ભસમુત્પન્નો ભીમો ભીમપરાક્રમઃ ।
લાક્ષાગૃહાદ્વિનિર્મુક્તો હિડિમ્બાસુરમર્દનઃ ॥ ૨૧॥

ધર્માનુજઃ પાણ્ડુપુત્રો ધનઞ્જયસહાયવાન્ ।
બકાસુરવધોદ્યુક્તસ્તદ્ગ્રામપરિરક્ષકઃ ॥ ૨૨॥

ભિક્ષાહારરતો નિત્યં કુલાલગૃહમધ્યગઃ ।
પાઞ્ચાલ્યુદ્વાહસઞ્જાતસમ્મોદો બહુકાન્તિમાન્ ॥ ૨૩॥

વિરાટનગરે ગૂઢચરઃ કીચકમર્દનઃ ।
દુર્યોધનનિહન્તા ચ જરાસન્ધવિમર્દનઃ ॥ ૨૪॥

સૌગન્ધિકાપહર્તા ચ દ્રૌપદીપ્રાણવલ્લભઃ ।
પૂર્ણબોધો વ્યાસશિષ્યો યતિરૂપો મહામતિઃ ॥ ૨૫॥

દુર્વાદિગજસિંહસ્ય તર્કશાસ્ત્રસ્ય ખણ્ડકઃ ।
બૌદ્ધાગમવિભેત્તા ચ સાઙ્ખ્યશાસ્ત્રસ્ય દૂષકઃ ॥ ૨૬॥

દ્વૈતશાસ્ત્રપ્રણેતા ચ વેદવ્યાસમતાનુગઃ ।
પૂર્ણાનન્દઃ પૂર્ણસત્વઃ પૂર્ણવૈરાગ્યસાગરઃ ॥ ૨૭॥

ઇતિ શ્રુત્વા નારદસ્તુ વાયોશ્ચરિતમદ્ભુતમ્ ।
મુદા પરમયા યુક્તઃ સ્તોતું સમુપચક્રમે ॥ ૨૮॥

રામાવતારજાતાય હનુમદ્રૂપિણે નમઃ ।
વાસુદેવસ્ય ભક્તાય ભીમસેનાય તે નમઃ ॥ ૨૯॥

વેદવ્યાસમતોદ્ધારકર્ત્રે પૂર્ણસુખાય ચ ।
દુર્વાદિધ્વાન્તચન્દ્રાય પૂર્ણબોધાય તે નમઃ ॥ ૩૦॥

ગુરુરાજાય ધન્યાય કઞ્જનેત્રાય તે નમઃ ।
દિવ્યરૂપાય શાન્તાય નમસ્તે યતિરૂપિણે ॥ ૩૧॥

સ્વાન્તસ્થવાસુદેવાય સચ્ચિત્તાય નમો નમઃ ।
અજ્ઞાનતિમિરાર્કાય વ્યાસશિષ્યાય તે નમઃ ॥ ૩૨॥

અથાભિવન્દ્ય પિતરં બ્રહ્માણં નારદો મુનિઃ ।
પરિક્રમ્ય વિનિર્યાતો વાસુદેવં હરિં સ્મરન્ ॥ ૩૩॥

અષ્ટોત્તરશતં દિવ્યં વાયુસૂનોર્મહાત્મનઃ ।
યઃ પઠેચ્છ્રદ્ધયા નિત્યં સર્વબન્ધાત્ પ્રમુચ્યતે ॥ ૩૪॥

સર્વરોગવિનિર્મુક્તઃ સર્વપાપૈર્ન લિપ્યતે ।
રાજવશ્યં ભવેન્નિત્યં સ્તોત્રસ્યાસ્ય પ્રભાવતઃ ॥ ૩૫॥

ભૂતગ્રહનિવૃત્તિશ્ચ પ્રજાવૃદ્ધિશ્ચ જાયતે ।
આયુરારોગ્યમૈશ્વર્યં બલં કીર્તિં લભેત્ પુમાન્ ॥ ૩૬॥

યઃ પઠેદ્વાયુચરિતં ભક્ત્યા પરમયા યુતઃ ।
સર્વજ્ઞાનસમાયુક્તઃ સ યાતિ પરમં પદમ્ ॥ ૩૬॥

ઇતિ શ્રીપદ્મોત્તરખણ્ડતઃ શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail

*shrIhanumadaShTottarashatanAmastotram 1*

pdf was typeset on August 24, 2024

Please send corrections to *sanskrit@cheerful.com*